## अस्य च्वौ। (३२/२११८)

[1]ई इति वर्तते। अवर्णान्तस्याङ्गस्य च्वौ परतः ईकारादेशो भवति[2]। [3]शुक्लीभवति। शुक्लीस्यात्। खट्वीकरोति। [4]खट्वीस्यात्॥

## क्यचि च। (३३/२६५८)

अस्य (७.४.३२/२११८) इति वर्तते। क्यचि[5] परतः अवर्णान्तस्य अङ्गस्य ईकारादेशो भवति। पुत्रीयति। [6]घटीयति। [7]खट्वीयति। मालीयति। '[8]अकृत्सार्वधातुकयोर्दीर्घः' (७.४.२५/२२९८) इत्यस्यापवादः। पृथग्योगकरणमुत्तरार्थम्॥

## अशनायोदन्यधनाया बुभुक्षापिपासागर्धेषु। (३४/२६६१)

अशनाय उदन्य धनाय इत्येतानि निपात्यन्ते[9] बुभुक्षा पिपासा गर्ध इत्येतेषु अर्थेषु। अशनाय इत्यशनशब्दस्य आत्वं क्यचि निपात्यते। अशनायति इति भवति बुभुक्षा चेत्। अशनीयति [10]इत्येवान्यत्र। उदन्य इति उदकशब्दस्य उदन्नादेशो निपात्यते। उदन्यति इति भवति पिपासा चेत्। उदकीयति [11]इत्येवान्यत्र। धनाय इति धनशब्दस्य आत्वं निपात्यते। धनायति इति भवति गर्धः चेत्। धनीयति [12]इत्येवान्यत्र॥

## न च्छन्दस्यपुत्रस्य। (३५/३५८८)

छन्दसि विषये पुत्रवर्जितस्य अवर्णान्तस्य अङ्गस्य क्यचि[13] यदुक्तं तन्न भवति। किं चोक्तम्? दीर्घत्वम् ईत्वं च[14]। 'मित्रयुः' (मै. २.६.१२)[15]। '[16]संस्वेदयुः' (मै. ४.१२.२)। 'देवाञ् जिगाति सुम्नयुः' (ऋ. ३.२७.१)। अपुत्रस्य इति किम्? 'पुत्रीयन्तः सुदानवः' (ऋ. ७.९६.४)।

[८७२] अपुत्रादीनामिति वक्तव्यम्। (म. भा. ३. ३४९)

'जनीयन्तोऽन्वग्रवः[17]' (ऋ. ७.९६.४)॥

## दुरस्युर्द्रविणस्युर्वृषण्यति रिषण्यति। (३६/३५८०)

[18]दुरस्युः द्रविणस्युः वृषण्यति रिषण्यति इत्येतानि छन्दसि[19] निपात्यन्ते। दुष्टशब्दस्य क्यचि दुरस्भावो निपात्यते। [20]अवियोना दुरस्युः। दुष्टीयति इति प्राप्ते। द्रविणशब्दस्य द्रविणस्भावो निपात्यते। 'द्रविणस्युर्विपन्यया' (ऋ. ६.१६.३४)। द्रविणीयति इति प्राप्ते। वृषशब्दस्य वृषण्भावो निपात्यते। 'वृषण्यति' (ऋ. ९.५.६)। वृषीयति इति प्राप्ते। रिष्टशब्दस्य रिषण्भावो निपात्यते। 'रिषण्यति' (ऋ. २.२३.१२)। रिष्टीयति इति प्राप्ते॥

---

1. वाक्यमिदं नास्ति इ. 2. च्वौ च इति दीर्घस्यापवादः इत्यधिकम् इ. 3. शुक्लीकरोति क. इ. 4. खट्वीभवति क. इ. ह. 5. च प्रत्यये इत्यधिकम् इ. 6. पटीयति इ. 7. नास्ति ब. 8. वाक्यमिदं नास्ति ब. 9. यथासङ्ख्यम् इत्यधिकम् ब. इ. ह. 10–12. इत्यन्यत्र इ. 13 प्रत्यये इत्यधिकम् ह. 14. तद् द्वयमपि प्रतिषिध्यते इत्यधिकम् ब. 15. सनाशंसभिक्ष उः इत्यधिकृत्य क्याच्छन्दसि इति ताच्छीलिक उप्रत्यय इत्यधिकम् इ. 16. नास्ति ह. 17. इति इत्यधिकम् ह. 18. छन्दसि इति वर्तते इत्यधिकम् इ. 19. विषये इत्यधिकम् ह. 20. अहिर्योना दुरस्युः अतियोन्यो इ, अनयोना दुरस्युः ह, अवबाढो दुरस्युः काठ. 2. 11.